श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीमन्त्रराजपदस्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्त्रराजपदस्तोत्रम् ॥

श्री ईश्वर उवाच

वृत्तोत्फुल्ल विशालाक्षं विपक्षक्षय दीक्षितम्।
निनादत्रस्तविश्वाण्डं विष्णुं उग्रं नमाम्यहम्॥ १ ॥

सर्वैरवध्यतां प्राप्तं सबलौघं दितेः सुतम्।
नखाग्रैः शकलीचक्रे यस्तं वीरं नमाम्यहम्॥ २ ॥

पदावष्टब्धपाताळं मूर्धाविष्ट त्रिविष्टपम्।
भुजप्रविष्टाष्टदिशं महाविष्णुं नमाम्यहम्॥ ३ ॥

ज्योतींष्यर्केन्दु नक्षत्र ज्वलनादीन्यनुक्रमात्।
ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम्॥ ४ ॥

सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा।
यो जानाति नमाम्याद्यं तमहं सर्वतोमुखम्॥ ५ ॥

नरवत् सिंहवच्चैव यस्य रूपं महात्मनः।
महासटं महादंष्ट्रम् तं नृसिंहं नमाम्यहम्॥ ६ ॥

यन्नामस्मरणाद् भीताः भूतवेताळराक्षसाः।
रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम्॥ ७ ॥

सर्वोऽपि यं समाश्रित्य सकलं भद्रमश्नुते।
श्रिया च भद्रया जुष्टो यस्तं भद्रं नमाम्यहम्॥ ८ ॥

साक्षात् स्वकाले संप्राप्तं मृत्युं शत्रुगणान्वितम्।
भक्तानां नाशयेद् यस्तु मृत्युमृत्युं नमाम्यहम्॥ ९ ॥

नमस्कारात्मकं यस्मै विधायाऽऽत्मनिवेदनम्।
त्यक्तदुःखोऽखिलान् कामान् अश्नन्तं तं नमाम्यहम्॥ १० ॥

दासभूताः स्वतस्सर्वे ह्यात्मानः परमात्मनः।
अतोऽहमपि ते दासः इति मत्वा नमाम्यहम्॥ ११ ॥

शङ्करेणाऽऽदरात् प्रोक्तं पदानां तत्त्वनिर्णयम्।
त्रिसन्ध्यं यः पठेत् तस्य श्रीर्विद्याऽऽयुश्च वर्धते॥ १२ ॥

॥ इति श्रीमन्त्रराजपदस्तोत्रम् समाप्तम् ॥